# 'सर्वं परित्यज्य कृषिं यत्नेन कारयेत्'

**श्री राम शर्मा**
**कनिष्ठानुसन्धाता**
**संस्कृतसंवर्धनप्रतिष्ठानम्**

**अन्नमयः कोशः, प्राणमयः कोशः, मनोमयः कोशः, विज्ञानमयः कोशः एवञ्च आनन्दमयः कोशः**

मानवीयजीवनस्य विकास-सन्दर्भे तैत्तिरीयोपनिषदि पञ्च-कोशानां चर्चा कृता वर्तते। एषा चर्चा मूलरूपेण मानवस्य सम्पूर्ण-व्यक्तित्वस्य चर्चा एव भासते। स्पष्टमेव यत् एतेषु पञ्चकोशेषु अन्नमयः कोशः एव सर्वेषाम् अन्येषां कोशानाम् आधारः वर्तते। एषः कोशः मूलतः मानवस्य शरीरस्य स्वरूपं स्पष्टीकरोति। अतः शरीरस्य विकासार्थम् अन्नस्य आवश्यकता भवति –

**'मह इति अन्नम्। अन्नेन वाव सर्वे प्राणा महीयन्ते'** ***(पञ्चम-अनुवाक्)***

सङ्केतितम् एव यत् अस्मिन् जगति सर्वेऽपि प्राणिनः जीवनम् उत्तमतया प्रवर्तयितुम् अन्ने एव आश्रिताः भवन्ति। मनुष्याणां जीवनस्य आधारः अन्नमेव अस्ति। अन्नेन एव समस्तजीवाः पुष्टिं लभमानाः विविधकार्याणि सम्पादयितुं समर्थाः भवन्ति। अन्नस्य अभावे जीवनम् असम्भवमेव। उत्तमानाम् अन्नानां प्राप्तये सर्वैः अपि कृषिकर्म अवश्यं करणीयम् एव येन जीवनं सुचारुरूपेण सम्पादयितुं शक्यते –

**"जीवन्ति स्वधयान्नेन मर्त्याः"**[1]

अन्नार्थं कृषिकर्म अनिवार्यम् अस्ति। वैदिककालात् एव कृषिकर्मणः उपादेयता आवश्यकता अनिवार्यता च आचार्यैः स्पष्टीकृता वर्तते। अन्नं धान्येन उत्पद्यते, धान्यं कृषिकर्म विना प्राप्तुं नैव शक्यते अतः सर्वं विहाय कृषिकर्मणि संलग्नः भवेत् –

**अन्नं हि धान्यसञ्जातं धान्यं कृष्या विना न च।**
**तस्मात् सर्वं परित्यज्य कृषिं यत्नेन कारयेत्॥**[2]

कृषिः इति स्वतन्त्रा वृत्तिः वर्तते। इदं कृषिकर्म तादृशं साधनं साध्यं च अस्ति यत् कश्चित् अपि जनः अपहर्तुं न शक्नोति। एतत् अन्नं देवानामपि प्रीतिजनकं शुद्धद्रव्यप्रदायकं सर्वेषां प्राणिनां च कृते अधिकृतम् अस्ति। कृषिकर्मद्वारा परतन्त्रता नश्यति, गृहे नित्यं लक्ष्म्याः वासः भवति, सहैव देवतानाम् अतिथीनां परिजनानां च जीवनदायकं भवति –

**पारतन्त्र्यहरं चैव नित्यलक्ष्मीविलासकृत्।**
**तथातिथीनां देवानां स्वकुटुम्बस्य जीवदम्॥**[3]

महर्षिणा पराशरेण अन्नस्य महत्त्वं सुस्पष्टं प्रतिपादितम् अस्ति। अन्नमेव प्राणाः बलं सर्वकार्यसाधकं च अस्ति। देवदानवमनुष्याः सर्वे अपि अन्नाश्रिताः एव सन्ति –

**अन्नं प्राणाः बलमन्नमन्नं सर्वार्थसाधनम्।**
**देवासुरमनुष्याश्च सर्वे चान्नोपजीविनः॥**[4]

कृषिवृत्तिरेव सर्वासु वृत्तिषु सनातनी शुभा च अस्ति, सा एव प्रशस्ता ऐश्वर्यदायिनी अस्ति –

**सर्वेषामेव तेषां तु कृषिवृत्तिः सनातनी।**
**शुभदा भूतिदा श्लाघ्या यथान्यायं प्रवर्तनात्॥**[5]

---

[1] अथर्ववेदः१२.१.२२
[2] कृषिपराशरः ७
[3] काश्यपीयकृषिपद्धतिः २३९
[4] कृषिपराशरः ६

समर्थवता मनुष्येण लोके स्थितानां जीवानां हितार्थं कृषिकार्यं कर्तव्यम् । यतोहि कृषिकार्ये संलग्नः असमर्थः मानवः तु कृषिं नाशयति एव, तस्मात् सः याचनां कृत्वा एव जीवनयापनं करोति –

**समर्थेन कृषिः कार्या लोकानां हितकाम्यया ।**
**असमर्थो हि कृषको भिक्षां प्राप्नोति मानवः ।।**[6]

## कृषिकर्मणः मुख्यरूपेण आधारः पृथ्वी अस्ति ।

पृथिव्याः श्रेष्ठः धर्मः यशः च सस्यादिः एव अस्ति, सस्यपूर्णा पृथिवी प्राणिनां जीवनप्रदात्री वर्तते –

**सस्यादिरेव मेदिन्याः परोधर्मः परं यशः ।**
**सस्यपूर्णा वसुमती प्राणीनां प्राणवर्धिनी ।।**[7]

देवि ! त्वं सर्वेषां शस्यानाम् आधारभूता असि । त्वं सर्वशस्यैः सम्पन्ना असि । त्वमेव सर्वाणि शस्यानि प्रददासि । यथाकाले त्वम् एव सर्वाणि शस्यानि अपहरसि । अस्य संसारस्य त्वमेव सर्वशस्यस्वरूपिणी असि

**सर्वशस्यालये सर्वशस्याढ्ये सर्वशस्यदे ।**
**सर्वशस्यहरे काले सर्वशस्यात्मिके भवे ।।**[8]

## कृषियोग्यायाः भूमेः परीक्षणम्

कृषिकार्याय महत्त्वपूर्णम् उपकरणं भूमिः एव भवति । उत्तमायां भूमौ कृषिकर्मणा अधिकः लाभः प्राप्तुं शक्यते, तत्रैव यदि भूमिः कृषेः अनुकूला नास्ति, तर्हि कृषिरूपः परिश्रमः व्यर्थः भवितुम् अर्हति, अतः कृषेः निमित्तम् आदौ कृषियोग्यायाः भूमेः चयनम् आवश्यकम् ।

**भूमेः परीक्षणसन्दर्भे ध्यातव्याः केचन अंशाः सन्ति ।** अस्थिभिः पाषाणखण्डैः च रहिता, कोमलाभिः मृत्तिकाभिः युक्ता, स्निग्धा, अल्परक्तवर्णा अथवा कृष्णवर्णा, तुषैः काचैः च रहिता, सारयुक्ता, रसयुक्ता, च भूमिः कृषियोग्या भवति । पुनश्च भूमिः अधिकैः रन्ध्राकाशैः युक्ता न स्यात्, अति निम्ना न स्यात्, अति उन्नता न स्यात् अपितु समस्थला स्यात् इति विचारः करणीयः । यस्यां भूमौ मल्लिकायाः जात्याः कुटजस्य अथवा सुरायाः गन्धः स्यात्, सा भूमिः कृषिकार्यार्थम् उत्तमा भवति । यस्मिन् क्षेत्रे कमलदलानि जायन्ते, तत्रत्या भूमिः कृषेः निमित्तम् उत्तमा, यत्र खर्जुरवृक्षाः जायन्ते तत्रत्या भूमिः मध्यमा भवति एवञ्च यत्र तिनिशवृक्षाः अधिकाः जायन्ते तत्रत्या भूमिः कृषिनिमित्तम् अधमा भवति इति ज्ञातव्यम् । कृषिभूमेः चयनसन्दर्भे एतद् अपि विचारणीयं यत् भूमिः अधिकजलशोषिका न स्यात् –

**अस्थिपाषाणखण्डाद्यैः हीनां मृदुलमृत्तिकाम् ।**
**सुस्निग्धामल्परक्तां च कृष्णवर्णां तथैव च ।**
**तुषकाचविहीनां च सारां रससमुज्ज्वलाम् ।।**
**न श्वभ्रयुक्तां नागाधां नोत्तुङ्गां च समस्थलाम् ।**
**मल्लिकाजातिकुटजसुरागन्धसमुज्ज्वलाम् ।।**
**अथवा पद्मखर्जूरतिनिशप्रसवक्रमाम् ।**
**अपीतसलिलां शश्वत् पीतोदकजलामपि ।।**[9]

---

[5] काश्यपीयकृषिपद्धतिः २३३
[6] कृषिपाराशरः ३.४
[7] काश्यपीयकृषिपद्धतिः १.१८
[8] ब्रह्मवैवर्तपुराण - पृथ्वीस्तोत्र ३
[9] काश्यपीयकृषिपद्धतिः १. ३३-३६

## सस्यानुसारं भूमेः संज्ञा

यस्यां भूमौ शाल्यादीनां विविधप्रकारकाणां तण्डूलधान्यानां कृषिः भवति सा जलभूमिः कथ्यते, तथा च यस्यां भूमौ आढकी इत्यादि-धान्यानां कृषिः भवति सा तारभूमिः उच्यते।

**व्रीहि क्षेत्रं तु भूलोके जलभूमिरितीरितम्।**
**माषादिक्षेत्रभूमिस्तु तारभूमिरिति स्मृता॥**[10]

## भूकर्षणम्

सर्वविधस्य कृषिकर्मणः आदौ भूक्षेत्रस्य कर्षणम् आवश्यकं भवति, भूकर्षणं कृत्वा एव भूमेः क्रोडे बीजवपनं सफलं भवति, भुवः कर्षणेन विना बीजवपनं तु निष्फलम्, तेन बीजानाम् अङ्कुरणं सम्यक् न भवति। यस्मिन् स्थाने यदा प्रथमवृष्टेः प्रागेव आकाशे मेघाः दृश्यन्ते तदा भूकर्षणं करणीयम् एषः कालः श्रेष्ठः भवति इति मुनयः कथितवन्तः –

**यस्मिन् देशे यदा वृष्टिः प्रथमा दृश्यते क्षितौ।**
**तदा भूकर्षणं श्रेष्ठमाहुरत्र मुनीश्वराः॥**[11]

## कृष्यर्थं हलयन्त्रम्

प्राचीनकालादेव हलयन्त्रस्य उपयोगः कृषिकार्यार्थं क्रियते। इदम् उपकरणं काष्ठेन निर्मितं भवति। वृषभयुगलैः अन्यपशूनां युगलैः च हलः उह्यते। अस्य उपकरणस्य अग्रभागे लौहस्य क्षुरपत्रं भवति । हलस्य मुख्यभागः काष्ठेन निर्मितः भवति। अस्य एकस्मिन् कोणे ग्राहः(handle) भवति। अपरः कोणः 'जोत' इत्यनेन सह सम्बद्धः भवति। तत् वृषभयोः ग्रीवयोः संस्थाप्य सम्बद्ध्यते। वृषभयुगलं, कश्चित् जनः च अयं सारल्येन चालयितुं शक्नोति।

## हलस्य अष्टौ अङ्गानि

'ईषा, युगः, हलस्थाणुः, निर्योलः, निर्योलस्य पाशिकाः, अड्डचल्लः, शौलः, पच्चनी' इत्येतानि हलस्य अष्टौ अङ्गानि भवन्ति। खनित्रं, कुद्दालं, लवित्रम् इत्यादीनाम् उपकरणानाम् उपयोगः अपि कृषिकर्मणि भवति।

## चतुर्विधकृषिकर्म

मुख्यरूपेण मुनिभिः शाल्यादिः, आढकादिः, शाकादिः, लताकुसुमवर्गादिः इति भेदेन कृषिकर्मणः चतुर्विधत्वम् उक्तं वर्तते –

**शाल्यादिकस्तु प्रथमः निर्दिष्टो हि मुनीश्वरैः।**
**आढकादि द्वितीयश्च तृतीयः शाकसन्ततिः॥**
**लताकुसुमवर्गस्तु चतुर्थः किलकीर्तितः।**
**एतच्चतुर्विधं लोके कृषिकर्म विनिश्चितम्॥**[12]

## शाल्यादिः

तण्डुलद्रव्येषु - शाल्यादिः कलमादिः षष्टिकादिः इति भेदेन त्रिविधं व्रीहिधान्यं वर्तते। विभिन्न-देशानां कृषिभूमिः भिन्नाः वर्तते इति कारणात् विद्वद्भिः शालिव्रीहेः षड्विंशतिः भेदाः कथिताः सन्ति।

शाल्यादीनां कृषेः निमित्तम् अधिकस्य जलस्य आवश्यकता भवति। किञ्च शालिधान्यस्य कृषिः जलभूमौ एव भवति।

---

[10] काश्यपीयकृषिपद्धतिः १.५३९

[11] काश्यपीयकृषिपद्धतिः १. २६८,२६९

[12] काश्यपीयकृषिपद्धतिः १.३५४, ३५५.

## आढकादिः

सूपद्रव्येषु आढकी, माषः, मुद्गः, चणकः, तिलः, गोधूमः, कुलुत्थः, कोद्रवः, यवः, सर्षपः, एरण्डः इत्यादीनां धान्यानां कृषिः भवति।

## शाकादिः

शाकानां कृषिः तारभूमौ जलभूमौ वा कर्तुं शक्यते। स्वदेश-काल-परम्परानुसारेण शाकानां कृषिकर्म करणीयम् -

**तारभूमितले वापि जलभूमितलेऽपि वा।**
**ऋतुयोग्यं देशयोग्यं पारंपर्यक्रमोद्भवम्॥**
**रीतिं च विज्ञाय बुधः शाकद्रव्यं विवर्धयेत्।** २.११,१२

शाकादीनां कृषिः सर्वकालेषु कर्तुं शक्यते एवञ्च सर्वदा फलदायकं भवति -

**शाकादिकृषिकार्यं च फलदं च विनिश्चितम्।**
**वसन्तकाले ग्रीष्मे वा हैमन्ते वापि वा क्वचित्। २.२२**

शाकद्रव्येषु जटिका, राशिजटिका, वल्लिका, वनवल्लिका, पटोलिका, वार्ताकः, षवकः, कूष्माण्डः, कलाटकः, कुस्तम्बुरुः, कलाटः, सूरणः, शाकुटः, हरिद्रा, शुण्ठीः, पलाण्डुः इत्यादीनां शाकानां कन्दशाकानां च कृषिः कर्तुं शक्यते।

## लताकुसुमवर्गादिः

अलावुः, कुष्माण्डः, खर्ज्जुरी, कर्कटी, वास्तूकः, कारवेल्लः, वार्त्ताकुः इत्येषां लतानां, तथा च चम्पकः, पद्मं, कनकं, मल्लिका, कर्णिकारः, पाटलपुष्पम् इत्यादीनां पुष्पाणां कृषिः अपि उत्तमा कथिता वर्तते।

**मल्लीचम्पकमुख्यानि कुसुमान्यपि युक्तितः।**[13]

एतत् पूर्वोक्तं चतुर्विध-कृषिकर्म एव मुख्यम् अस्ति। एवञ्च यथा कृषिकार्याय भूमिः मुख्या वर्तते तद्वत् एव बीजम् अपि मुख्यम् अस्ति।

## बीजाधारिता कृषिः

कृषिकार्यार्थं बीजस्यापि मुख्यत्वं कथितं वर्तते। सर्वाणि अपि धान्यानि बीजाधारितानि वर्तन्ते। यदा पर्यन्तं बीजस्य वपनम् एव न भवति तदा पर्यन्तं धान्यादिकं भवितुम् एव नार्हति। बीजानां संरक्षणम् एव कृषिकर्मणः प्रथमं कार्यम् अस्ति। अतः कृषिकार्याय बीजानि मुख्यानि सन्ति –

**आरब्धं कृषिकार्यं तु बीजमुख्यं प्रकीर्तितम्**[14] **।**

## कृषिक्रमः

**भूमीनां कर्षणं चादौ ततो बीजाङ्कुरार्पणम्।**
**तृणकाष्ठोत्क्षेपणं च पुनस्तत्कर्म चादरात्।**
**जलसंपूरणं चैव शालि संरक्षणं तथा।**
**तुल्यरूपं तुल्यकार्यं निश्चितं कृषिकोविदैः।**[15]

---

[13] काश्यपीयकृषिपद्धतिः २.१०२
[14] काश्यपीयकृषिपद्धतिः १.३६०
[15] काश्यपीयकृषिपद्धतिः १. ४६०-४६१

**भूकर्षणम्** } हलयन्त्रेण भूमेः कर्षणं करणीयम् ।
**बीजवपनम्** } उत्तमानां बीजानां वपनम् ।
**मयिकादानम्** } बीजानां वपनानन्तरं भूम्याः समतलीकरणं करणीयम् ।
**अङ्कुरणम्** } धान्यानुसारं बीजवपनस्य ७ वा ८ दिनेषु अङ्कुरोत्पत्तिः भवति ।
**धान्यनिस्तृणीकरणम्** } यदा शस्यं वर्धितं भवति तदा तत्र क्षेत्रे अवापितानां तृणादीनां निष्कासनम् ।
**उर्वरकप्रदानम्** } मृत्तिकायुक्तम् उर्वरकं शस्यस्य मूलभागे प्रदेयं भवति ।
**जलसेचनम्** } तृणादीनां निष्कासनान्तरम् आवश्यकतानुसारं जलसेचनम् ।
**धान्यकर्तनम्** } यदा शस्यं पक्वं भवति तदा शस्यस्य कर्तनं रक्षणं च करणीयम् ।
**धान्यकुट्टनम्** } शस्यकर्तनानन्तरं आतपे शोषयित्वा दण्डाद्यैः मर्दनं कुट्टनं वा करणीयम् ।
**भाण्डीकरणम्** } धान्यं स्वच्छीकृत्य आतपे शोषयित्वा पृथक् पृथक् पात्रेषु सङ्ग्रहणीयम् ।

## उपसंहारः

भारतदेशः कृषिप्रधानः देशः कथ्यते । विद्वद्भिः प्राचीनकालात् एव कृषिकर्मणः मुख्यता स्व-रचितग्रन्थेषु प्रतिपादिता वर्तते । "कृषिशास्त्रम्" आधारीकृत्य अनेकै विद्वद्भिः कृषिपाराशरः, काश्यपीयकृषिसूक्तिः, वृक्षायुर्वेदः इत्यादयः स्वतन्त्रग्रन्थाः अपि रचिताः सन्ति । ऋषीणाम् अयं परामर्शः अस्ति यत् सर्वे अपि समुदायाः सुनियोजितरूपेण सक्रियतापूर्वकं कृषिकर्म कुर्युः तथा च एतस्याः कृषेः सर्वेषु अपि देशेषु सर्वेषु ग्रामेषु प्रभागेषु च विस्तारः स्यात् । सर्वे अपि पुरुषार्थिनः बुद्धिमन्तः च जनाः यदि शाश्वतमानन्दं प्राप्तुम् इच्छन्ति तर्हि तैः कृषिकर्म अवश्यमेव करणीयम् ।

**********************************